# ।।कर्मणैव हि संसिद्धिः ।।

# ( नाटकम् )

रचयिता

शङ्करनारायणः

प्राध्यापकः जी एच् एस् एस् इटप्पल्ली

## ।।कर्मणैव हि संसिद्धिः ।।

## ( नाटकम् )

कथापात्राणि -

| | |
|---|---|
| सूत्रधारः | |
| भद्रकः - | सूत्रधारस्य मित्रम् । |
| मरीचिः - | सप्तर्षिषु अन्यतमः। |
| अत्रिः - | सप्तर्षिषु अन्यतमः । |
| अङ्गिराः - | सप्तर्षिषु अन्यतमः। |
| पुलस्त्यः - | सप्तर्षिषु अन्यतमः। |
| पुलहः- | सप्तर्षिषु अन्यतमः । |
| क्रतुः - | सप्तर्षिषु अन्यतमः । |
| वसिष्ठः - | सप्तर्षिषु अन्यतमः। |
| रत्नाकरः - | निषादः । |
| निषादी - | रत्नाकरस्य भार्या । |
| ज्येष्ठः | रत्नाकरस्य प्रथमः पुत्रः। |
| कनिष्ठः | रत्नाकरस्य द्वितीयः पुत्रः । |
| वाल्मीकिः - | ब्रह्मर्षिः , आदिकविः , रामायणकर्ता । |

**स्थापना**

**(नान्दी )**

सप्तर्षिसङ्गमवशादुपलब्धराम

नामामृतप्रभवतो गतकिल्बिषं तम् ।

रामायणप्रणयिचित्तनभप्रदीपं

वाल्मीकिनामकमुनीश्वरमानतोस्मि ।।

(नान्द्यन्ते सूत्रधारः प्रविशति ।)

सूत्रधारः - अहो कालो ह्ययं सर्वजनचित्ताह्लादकारको वसन्तः। तथापि केनापि नूतनेन कोरोणाभिधानेन सांक्रमिकव्याधिना भीताः जनाः तत्संक्रणोपशान्त्यै सर्वकारनिर्देशेन स्वस्ववेश्मसु स्वैरं वसन्ति। ते च दृश्य श्रव्य सामूहिकमाध्यमानां चित्रेषु सन्देशेषु च मनसा निमज्य रोगविषयकवृत्तान्तैः विनष्टोत्साहाः जाताः ।अतः चिरपरिचितं कमपि कथावस्तुमुपजीव्य नूतनया शैल्या नाटकमभिनेतव्यमिति गुरोराज्ञा । गुरुवचनमनतिक्रमणीयमिति स्मृतिश्च । अतः नाटकाभिनयार्थं सामाग्रीनां सज्जीकरणाय आत्ममित्रं भद्कमाह्वयामि (उच्चैः भद्रक .......... भो भद्रक ........ ( परिक्रम्य अवलोक्य च ) अये अयं भद्रकः कस्मादपि दुर्दशनात् भीतः इव पुनः पुनः पश्चादवलोक्य इतः एवाभिगच्छति । भो वसन्तकः किं न श्रुणोषि मदाह्वानम् ?

( ततः प्रविशति यथानिर्दिष्टः वसन्तकः )

भद्रकः - श्रुणोमि देव ।कार्यमाज्ञाप्यताम् ।

सूत्रधारः - सम्प्रति हि सकलजनमनोरञ्जकेन नाटकेन लोकान् तोषयतु इति गुरोराज्ञा ।किं कुर्मः?

भद्रकः - पुरातनीं कथामुपजीव्य नूतनेन नाटकेन अभिनयः कार्यः इति ( स्वगतम् ) क्लिष्टा किल संस्कृते नूतननाटकानामुपलब्धिः ( चिन्तां नाटयित्वा ) हन्त एतदस्तु (प्रकाशम) अस्ति भो केरलसर्वकारस्य एकादशतमकक्ष्यायामेका कथा कर्मणैव संसिद्धिर्नामिका । तस्यास्तु नाटकरूपेण परिवर्तनं निर्व्यूढमस्ति छत्रपुरजनापदवासिना अल्पधीरपि गुरुकृपाजनितवाग्विभवेन शङ्करनारायणनामकेन केनचित्प्राध्यापकेन ।तमभिनीय सम्प्रति लोकरञ्जनं कुर्मः ।

सूत्रधारः - उपपन्नमिदम् ।तर्हि शैलूषान् प्रति नाटकाभिनयविषयकम् अस्मदीयं स्न्देशं न्यवेदयतु ।

भद्रकः - तथास्तु ।( गन्तुमुद्यमति , विशङ्क्य पुनः तत्रैव तिष्ठति )

सूत्रधारः - किं न गतवान् भवान् ? कः सन्देहः ? कुतः स्तम्भः इव अत्रैव तिष्ठति ? उच्यताम् ।

भद्रकः - देव भवता परिपालिताः सप्तशशकाः तृणाभिलाषात् आरण्यमध्यं प्रविशन्तीति मया दृष्टम् । तत्रास्ति कश्चन व्याध्रः। तेन व्यापादिताः स्युः इति मदीया चिन्ता ।

सूत्रधारः - हा धिक् ।प्रतिहतममङ्गलम् ।तथापि शशकानां नैर्मल्यस्वभावशीलादीन् दृष्ट्वा कदाचित् ते न व्यापादिताः स्युः यथा-

आरण्यमध्यगतसप्तमुनीश्वरास्ते

रत्नाकराभिमुखभीतमनाः कदाचित् ।

स्नेहान्वितातिमृदुभाषणपाटवेन

प्राप्ताः तदीयकरवालमुखाद्विमुक्तिम् ।।

( इति निष्क्रानतौ )

( इति स्थापना)

यवनिका

# १

(अथ प्रथमो रङ्गः )

रङ्गविवरणम्  - काननमध्यः ।विहगानानम् कूजनम् ।नद्याः प्रवाहनादः ।मृगाणाम् निनदम् ।

( ततः प्रविशन्ति यथोक्तवेषधारिणः सप्तर्षयः )

पुलस्त्यः - भगवन् वसिष्ठ ।शान्तिप्रदायकमिदं विपिनम् । यत्र हि -

वेदार्थज्ञानशौण्डानां साममन्त्रजपं यथा ।
कूजनछद्मना ह्येते स्तुवन्ति विहगाः प्रभुम् ।।

वसिष्ठः - सत्यमाह भवता ।ध्यानविलीनाः यतीश्वराः इव तिष्ठन्ति पादपाः ।(परिक्रम्य अवलोक्य ) अये केन वा कारणेन अकस्माद् परिभ्रान्ताः इव खगाः ससम्भ्रममुच्चैस्तरं रुदन्तः वृक्षशिखरेभ्यो जवाट्टयन्ते ? मृगाः इतस्ततो धावन्ति च (कर्णं दत्वा भीतिं नाटयित्वा ) किमपि धोरनिस्वनं च आरादभ्येति कर्णान्तिकम् ।अवहिताः स्म।

(नेपथ्ये - तिष्ठत ।तत्रैव तिष्ठत ।भवदीयं सर्वं प्रयच्छत ।नो चेत् प्राणान् हरिष्याम्यहम् )

( कर्णं दत्वा सर्वे भीतिं नाटयन्ति )

मरीचिः - ( पुरतो विलोक्य ससम्भ्रमं ) भगवन् वसिष्ठ । पश्यतु भवान् ।एषः भयङ्करः निषादः रक्तपङ्किलं खड्गमुन्नम्य अस्मान् प्रति प्रसार्य नः हन्तुमिहायाति ।

(ततः प्रविशति यथोक्तवेषधारी निषादः )

रत्नाकरः - तिष्ठत ।तत्रैव तिष्ठत ।भवदीयं सर्वं प्रयच्छत ।नो चेत् प्राणान् हरिष्याम्यहम् ।( साट्टहासं खड्गं प्रसारयति )

( सर्वे सभयं निषादं अवलोकयन्ति चिन्ताकुलाः च )

पुलस्त्यः - ( विचिन्त्य ) किमेनं वक्ष्ये ? कथमेनं शान्तं करिष्ये ? (प्रकाशम् ) भगवन् वसिष्ठ भवान् एव अस्य प्रत्युत्तरदाने दक्षः साम्ना तं वशे नयतु।(कर्णे एवमिव)

वसिष्ठः - युज्यते ।अये वत्स कस्त्वम् ? किमभिलषसि ?

रत्नाकरः - रत्नाकरो नाम निषादोहम् ।युष्मदीयं सर्वं मह्यं प्रयच्छत ।नो चेत् प्राणान् हरिष्यामि ।

वसिष्ठः - केवलं कमण्डलुर्वल्कलञ्च अस्माकं धनम् ।तेन तव किम् प्रयोजनम् ?

रत्नाकरः - किम् नास्ति धनम् वस्त्राणि आभरणानि रत्नानि च ?

वसिष्ठः - नास्त्येव ।वयम् ऋषयः ।केवलं कमण्डलुर्वल्कलञ्च अस्माकं धनम् ।तेन तव किम् प्रयोजनम्

रत्नाकरः - (सरोषम् ) कमण्डलुश्चेत् कमण्डलुः ।दातव्यम् तत् ।

वसिष्ठः - वत्स भवान् कः इति प्रश्नस्योत्तरं इदीनीमपि न दत्तं भवता ।

(निषादः सविस्मयं सप्तर्षीन् विलोकयति )

रत्नाकरः - (आत्मगतम् ) किन्नु मामेवं सम्बुद्धिं करोति ? किन्नु हासाय ? नैवं स्यात् ।वत्स इति अस्य सम्बोधनया मनसि काचिदानन्दानुभवः संवृत्तः ) अथवा यत्किमपि भवतु (प्रकाशम् ) रत्नाकरो नाम निषादोहम् ।पथिकानां धनानि अवश्यञ्चेत् प्राणान् चापहृत्य कुटुम्बं पोषयामि ।

वसिष्ठः - एवं वा ।सत्यमाह भवान् ।पतिधर्म एव कुटुम्बपालनम् ।किन्तु पथिकानां धनापहरणं किं न पापाय ? अस्य पापस्य तव कलत्रपुत्रादयो फलभाजः किम् ?

रत्नाकरः - तदहं न जाने ।

वसिष्ठः - एवं चेत् तान् पृष्ट्वा आगच्छतु ।

रत्नाकरः - हं ( सशङ्कं तान् विलोकयति )

वसिष्ठः- ( स्मितं कृत्वा ) यदा ते प्रत्यागमनं तावत्कालम् अत्रैव तिष्ठामो वयम् ।

रत्नाकरः - तथास्तु ।( गृहं लक्षीकृत्य गच्छति )

वसिष्ठः - (आत्मगतम् ) अधर्मकारी अयं निषादः ।तथापि ऋजुबुद्धिः ।कथमेनं अधर्माचरणात् रक्षयामि ? अस्तु एवं करणीयम् ।(प्रकाशम् ) भगवन् मरीचे !पुलस्त्य ! पुलह ! सर्वे वयं तं निषादं प्रतिपाल्य अस्य वटवृक्षस्य मूले उपविशामः ।

(सर्वे गच्छन्ति )

(यवनिका )

# २

(अथ द्वितीयो रङ्गः)

रङ्गविवरणम् - कमपि दरीमुखम् (निषादस्य वासस्थानम्) ।दरीमुखे अस्थिखण्डैः कपालैश्च निषादबालकौ क्रीडासंलग्नौ । पुलिन्दी गृहकर्मणि व्यापृता ।पच्यमानपललस्य गन्धः परितो व्याप्नोति ।

ज्येष्ठः - अनुज मह्यं दीयताम् तं तीक्ष्णं अस्थिखण्डम् ।

अवरजः - न प्रदास्ये ।एतं मदर्थे तातेन आनीतम् ।अनेन तव किम् कार्यम् ?

ज्येष्ठः - अहं शीघ्रं यौवनं प्राप्स्ये ।तदा मृगयायां जन्तून्हन्तुं तीक्ष्णं अस्थिखण्डमिदमावश्यकम् ।

अवरजः - अहमपि अचिरादेव यौवनं प्रापस्ये बलिष्ठश्च भवामि ।तदा मदर्थमिदमावश्यकम् ।अतो न प्रदास्ये ।

ज्येष्ठः - यदि न दास्ययि ताताय ते कृत्यं निवेदयामि ।तात .... ( अर्धोक्तौ विरमति ) हन्त तातः प्रभाते एव पथिकानां धनादिहरणार्थं गतः ।किमिदानीं करिष्ये ? ( चिन्तयति ) कश्चन पदविन्यासशब्दः निकटमायाति ।(परिक्रम्यावलोक्य च) अये शून्यहस्तः तातः इत एव आगच्छति ।

यदायं रिक्तहस्त स्यात् शून्यं मन्ये निजालयम् ।<br>क्रूरकर्मभिरेवायं अस्मान् पोषयतीति धिक् ।।

ज्येष्ठः - ( उपगम्य प्रणामं कृत्वा ) तात वन्दे ।

अवरजः - तात वन्दे ।

रत्नाकरः - क्व युवयोर्माता ?

ज्येष्ठः - अम्बा नूतने मनुष्यमांसपाचने निमग्ना ।तामाह्वयामि आनयामि च।(गच्छति )

( तदा प्रविशति यथोक्तवेषयुक्ता निषादी )

निषादी - जयतु भर्ता ।कुतो भवानचिरादेव शून्यहस्तः प्रत्यागतः ? किन्नु संवृत्तम् ?

निषादः - अद्य वने केचन सप्त ऋषयः समागताः ।तेषां धनापहरणाय उद्यते मयि वत्स कस्त्वं इति ते मामपृच्छन् ।

निषादी - ततस्तः।

रत्नाकरः - ततः ते मामेवमुक्तवन्तः - "पथिकानां धनापहरणं किं न पापाय , अस्य पापस्य तव कलत्रपुत्रादयेपि फलभाजः कि" इति

निषादी - तदा किमुक्तं त्वया ?

रत्नाकरः - तदहं न जाने इति प्रत्युत्तरमदात् ।तदा तान् पृष्ट्वा प्रत्यागच्चतु इति नियुज्य मां त्वदभ्याशं प्रेषितवन्तः ।किमहं प्रत्युत्तरं प्रदास्ये ? कुटुम्बपोषणार्थं कृतानां मदीयपापानां भवन्तोपि किं न फलभाजः ?

निषादी - (विहस्य ) फलभाजः इति ।रे मूर्ख ! के फलभाजः ? कथं फलभागित्वम् ? पश्य -

नित्यमाचरितानां हि
कर्मणां फलभोजने ।
तत्कर्तारं विना नान्यः
भोक्ता भवति कश्चन ।।

रत्नाकरः - किं वदसि ? न फलभाजिनः इति ?

निषादी - इदमपि श्रूयताम् ।

वपुषा मनसा वाचा
यद्यद् कर्म करोति यः ।
स एव तेषां भोक्ता च
नैव पत्नीसुतादयः ।।

( निषादी सोपहासं महानसं गच्छति ।रत्नाकरः चिन्तामग्नः तिष्ठति )

रत्नाकरः - (सविषादं ) अहो एतावत्कालं पापकर्मभिः अहं कुटुम्बं पुपोष ।परन्तु तेषां पापानां फलभोक्ता अहमेक एव ।क्रूरोहं । हा धिङ्माम् ! धिङ्मदीयमूर्खबुद्धिं ! नैकेषां साधूनां धाातकः सञ्जातोहम् ।साधूनां धनापहरणेन चोरः संवृत्तः ।हा हन्त (उच्चैः रुदति ) किमिदानीं करिष्ये ? ( चिन्तयित्वा ) भवतु विशिष्टगुणयुक्तान् तानेव मुनीन् शरणं प्राप्स्ये ।

( निष्क्रामति )

यवनिका

# ३

।। तृतीयः रङ्गः ।।

रङ्गविवरणं - पूर्वसूचित वनान्तर्भागः ।कस्यचन वटवृक्षस्य मूले सप्तर्षयः निषादं प्रतिपाल्य निष्ठन्ति ।

मरीचिः - चिरायते खलु निषादः ।

पुलस्त्यः - मन्ये अस्मान् केवलं कमण्डलुर्वल्कलमात्रधनान् ज्ञात्वा सः अस्मान् उझित्वा यत्र कुत्रापि गतवानिति ।

मरीचिः - नाहं संचिन्तयाम्येवम् ।सपरीवारस्य तस्य आगमनं स्यादिति तर्कयामि ।

मरीचिः - ( परितो विलोक्य ) पश्य भगवन् पुलस्त्य सोयं निषादः म्लानवदनः अधोमुखः खिन्न इव अस्मानभ्येति ।

(ततः प्रविशति यथोक्तनिर्दिष्टः रत्नाकरः )

रत्नाकरः - ( चिन्तयित्वा ) हा धिङ्मां पापकर्माणम् ।धिङ्मदीयां मूर्खधीम् ।किमिदानीं करिष्ये? भवतु तानेव शरणं यास्यामि । ते मम रक्षकाः स्युः ( परिक्रम्य अवलोक्य च) अहो ! मम भाग्यातिरेकात् एते न मामुझित्वा प्रयाताः ।

( वसिष्ठस्य समीपमुपगम्य पादयोः पतित्वा )

भगवन् परित्रायस्व मां पापकर्माणम् ।परित्रायस्व मां शरणागतम् ।

वसिष्ठः - ( निषादं सदयं विलोक्य ) उत्तिष्ठ वत्स ।ऋजुबुद्धिरसि ।तव पापनिवारणाय मन्त्रमेकं उपदिशामि ।तज्जपं कुरु सदा ।अनेन मार्गेण यदा अस्माकं प्रयिनिष्क्रमणं तावत्कालम् मन्त्रजपेन अत्रव उपविश ।(निषादस्य कर्णे मन्त्रमुपदिशति )

ऋषयः सर्वे - ( हस्तं उन्नमय्य तमनुगृह्य ) वत्स ! शाश्वतीं प्रतिष्ठां लभस्व ।

रत्नाकरः - ( अञ्जलीबद्धो भूत्वा ) राम... राम ..... राम....

(क्रमेण तन्नेत्रे अर्धनिमीलिते भवतः )

वसिष्ठः - साध्वयं निषादः ।रामनामजपतो विमुक्तकिल्बिषः भवेन्नूनम् ।गच्छामो वयम् ।

( सर्वे गच्छन्ति )

यवनिका

# ४

।। चतुर्थो रङ्गः ।।

रङ्गविवरणम् - पूर्वसूचितवनप्रदेशः ।वनमध्य उन्नतस्य कस्यचन वटवृक्षस्य अधः कश्चन महान् वल्मीकः ।

सप्तर्षयः आगच्छति ।

वसिष्ठः - आरण्यमध्यमतिशान्तमनन्तपुण्य -

संयुक्तमेव नहि संशमत्र मे S स्ति ।
शान्ताः खगाः मृगगणाः च वसन्ति यत्र
तत्रैव पुण्यचरिताः निवसन्ति सन्तः ।।

मरीचिः - अपि च

कोटिजन्मकृतपुण्यविपाकात्
कानने S त्र तरुतामुपयान्ति ।
चिन्तयामि ननु कस्य महर्षे-
राश्रमस्थलमिदं ह्यनवद्यम् ।।

( कर्णं दत्वा ) कुतो शान्तगभीरनिस्वनं राममन्त्रं मदीयश्रवणयोरभ्येत्य मामतिमात्रमाह्लादयति ।(परितो विलोक्य ) अहो अस्य वटवृक्षस्य अधस्थात् वल्मीकादेव राममन्त्रस्य सम्भवः ।(वसिष्ठमुद्दिश्य ) भगवन् वसिष्ठ पश्यतु भवानिदम् ।यत्रास्माभिः पुरा रत्नाकराभिधानं निषादं संस्थापितः तस्यैव वटवृक्षस्याधस्थितादूल्मीकादेव राममन्त्रध्वनिः ।किमु भञ्जयामि वल्मीकम्

वसिष्ठः - ( स्मितं कृत्वा ) भञ्जयैनम् ।

मरीचिः - तथास्तु ।

( सर्वे मुनयः वल्मीकं भञ्जयति ।तन्मध्ये अतितेजस्विनं तपस्विंनं दृष्ट्वा विस्मिताः )

(रङ्गे शंखनिनदः ।आकाशात् पुष्पवर्षश्च )

वसिष्ठः - हे मुने पावितोसि राममन्त्रेण । वल्मीकात् सम्भूतः इति कारणात् वाल्मीकिनाम्ना प्रसिद्धो भविष्यति ।यतिवर्य ! वयं त्वां प्रणमामः

( सर्वे वाल्मीकेः पादयोः पततन्ति )

वाल्मीकिः - भगवन् भवतां सङ्गमेन गतकिल्बिषः संवृत्तः ।मदीयां निषादतां विहाय तपस्वितां प्राप्ता ।किमिदानीं करोमि?

वसिष्ठ – राममन्त्ररजपरतस्य भवतः कर्तव्यं किं ? किमकर्तव्यम् ? तथापि -

(भरतवाक्यम)

रोगादिदुःखरहिता मनुजाः सदास्तु
नद्यश्च निर्मलपयांसि वहन्तु नित्यम् ।
काले तु वर्षण,मथास्तु च वृक्षवल्ली
सम्पूरितानि विपिनानि भवन्तु शान्त्यै ।।

written by
sankarjikodakara